वर्णिता प्रतिपत्तिथिः। प्रतिपन्नाम विज्ञेया चन्द्रस्य प्रथमा कला। शुक्लपक्षे विशेच्चन्द्रं कृष्णपक्षे विनिःसरेत्। शुद्धा विद्धा तिथिः शुद्धा हीनातिथ्यान्ययाहनि। उदये पूर्वया तिथ्या विध्यते त्रिमुहूर्त्तकैः। सायन्तूत्तरया तद्वन्न्यूनया तु न विध्यते। वेध्यापि त्रिमुहूर्त्तैव न न्यूना वेधमर्हति। शुद्धायां नास्ति सन्देहो दैवे पित्र्ये च कर्म्मणि। उपवासश्चैकभक्तं नक्तं चायाचितं व्रतम्। दानञ्च षड्विधं दैवं क्रमादत्र विविच्यते। एकोद्दिष्टं पार्वणञ्च पित्र्यं द्विविधमीर्य्यते। शुक्लपक्षे दर्शविद्धा कृष्णे विद्धा द्वितीयया। उपोष्या प्रतिपच्छुक्ले मुख्या स्यादापराह्णिकी। तदभावे तु सायाह्नव्यापिनी परिगृह्यताम्। प्रातःसङ्गवमध्याह्नापराह्णाः सायमित्यमी। अत्राह्नां पञ्चधा भागो मुख्यो द्वित्र्यादिभागतः। अभावेऽपि प्रतिपदः संकल्पः प्रातरिष्यते। तिथिस्त्रियामतोऽर्वाक् चेत् तिथ्यन्ते पारणं भवेत्। वह्न्युत्सवं च पूर्वेद्युरुपवासवदाचरेत्। सत्यतिथ्यन्तराये तु तिथिशेषोऽपि गृह्यताम्। शुद्धाऽधिका तु कृष्णापि पूर्वा संपूर्त्तिसंभवात्। ग्रहीतव्या त्वेकभक्ते मध्याह्नव्यापिनी तिथिः। परेद्युरेव पूर्वेद्युरेव व्याप्तिर्दिनद्वये। नोभयत्रोभयत्रांशे साम्यं वैषम्यमित्यमी। षट् पक्षास्तेषु चैकैकव्याप्तौ सैवात्र गृह्यताम्। दिनद्वयेऽपि तद्व्याप्त्यावव्याप्तौ चैकदेशतः। समव्याप्तौ च पूर्वैव वैषम्ये त्वधिकैष्यताम्। अन्याह्नस्यैकभक्तस्य कालस्त्वह्न्यनुसारतः। उपवासप्रतिनिधेस्तिथिः स्यादुपवासवत्। प्रदोषव्यापिनी नक्ते तिथिर्व्याप्तिर्दिनद्वये। अव्याप्तिर्वाथवांशेन व्याप्तिः स्यात् सर्वथोत्तरा। सौरनक्ते तु सायाह्नव्यापिनी न प्रदोषगा। अयाचिते तु तिथयः स्वीकार्य्याः उपवासवत्। सोदयत्रिमुहूर्त्तायां कुर्य्याद्दानं व्रतानि च। उभयत्र तथात्वे तु पूर्वेद्युस्तदनुष्ठितिः। परत्रैव तथात्वं चेत् पूर्वा ग्राह्या तिथिक्षये। तिथेः साम्ये च वृद्धौ च गृह्यतां तिथिरुत्तरा। अस्पर्शे चैकदेशस्य व्याप्तौ पूर्वैव गृह्यताम्। एकोद्दिष्टे तु मध्याह्नयुक्ता स्यादेकभक्तवत्। एकदेशे समव्याप्तौ क्षये पूर्वाऽन्यथोत्तरा। कुतपाद्यपराह्णस्य व्याप्तिरावृद्दिक उत्तमा। तदभावेऽपराह्णस्य व्यापिका गृह्यतां तिथिः। क्षये पूर्वोत्तरा वृद्धौ व्याप्तिश्चेदपराह्णयोः। न ग्राह्यतिथिगौ वृद्धिक्षयावूर्द्ध्वतिथेस्तु तौ। साम्ये त्वर्द्धतिथेर्ग्राह्या परविद्धैव वृद्धिवत्। न स्पृशत्यपराह्णौ चेत् पूर्वा स्यात् कुतपो दृशा। वैषम्ये चैकदेशस्य व्याप्तौ ग्राह्या महत्त्वतः। साम्येन चेत् क्षये पूर्वा परा स्याद्वृद्धिसाम्ययोः। वृद्धिसाम्यक्षया ग्राह्यतिथिगा नोर्द्ध्वगा इह। ४द्वितीयाद्यास्तु पर्वान्तास्तुर्य्यप्रकरणोदिताः। सञ्चारणीयः सामान्यतिथिषु प्रतिपन्नयः। क्वचित् क्वचिद्विशेषोऽस्ति सोऽयमत्राभिधीयते। पूर्वेद्युरसती प्रातः परेद्युस्त्रिमुहूर्त्तगा। सा द्वितीया परोपोष्या पूर्वविद्धा ततोऽन्यथा। रम्भातृतीया पूर्वा स्यादुत्तरा स्याद् व्रतान्तरे। परेऽह्नि नास्ति चेत् पूर्वविद्धाप्यस्तु व्रतान्तरे। मुहूर्तमात्रसत्त्वेऽपि दिने गौरीव्रतं परे। शुद्धाधिकायामप्येवं गणयोगप्रशंसनात्। चतुर्थी तु परोपोष्या गणनाथव्रतस्य तु। मध्याह्नव्यापिनी पूज्या तद्वन्नागचतुर्थ्यपि। परेद्युरेव मध्याह्नव्याप्तौ विघ्नस्य सोत्तरा। अन्यथा पूर्वविद्धैव मातृयोगप्रशस्तितः। पूर्वेद्युरेव तद्व्याप्तौ पूर्वा सर्पप्रिया तिथिः। नो चेत् सर्पस्य पञ्चम्या योगेऽत्यन्तं प्रशस्यते। गौर्य्याः शुद्धाजयायुक्ता, नागविद्धा निषिध्यते। सर्वत्र पञ्चमी पूर्वा ग्राह्या स्कन्दव्रते परा। नागविद्धा स्कन्दषष्ठी सा निषिद्धा व्रतान्तरे। उत्तरस्या अलाभे तु नागविद्धापि गृह्यताम्। विनाशाद्वा परेऽभावात् नागविद्धा न दोषकृत्। सप्तमी पूर्वविद्धैव व्रतेषु निखिलेष्वपि। अलाभे पूर्वविद्धायाः परविद्धापि गृह्यताम्। व्रतमात्रेऽष्टमी कृष्णा पूर्वा शुक्लाष्टमी परा। दूर्वाष्टमी तु शुक्लापि पूर्वविद्धा विधीयते। पक्षद्वयेऽप्युत्तरैव शिवशक्तिमहोत्सवे। ज्येष्ठर्क्षयोगे पूर्वैव ग्राह्या ज्येष्ठाव्रते तिथिः। मध्याह्नादूर्द्ध्वमृक्षं चेत् परेद्युः सा प्रशस्यते। ज्येष्ठर्क्षभानुवाराभ्यां युक्ताष्टम्यतिदुर्लभा। जयन्त्याख्यं व्रतं भिन्नं कृष्णजन्माष्टमीव्रतात्। शुद्धा च सप्तमीविद्धेत्येवं जन्माष्टमी द्विधा। सप्तमी चेन्निशीथात्प्राग्विद्धा शुद्धान्यथा भवेत्। शुद्धायां नास्ति सन्देहो विद्धा च त्रिविधेष्यते। निशीथयोगः पूर्वेद्युः परेद्युर्वा द्वयोरुत। पूर्वैव प्रथमे पक्षे परैवोत्तरपक्षयोः। अष्टमी रोहिणी शुद्धा जयन्ती सा चतुर्विधा। शुद्धा शुद्धाधिकेत्येवं विद्धाविद्धाधिकेति च। शुद्धायामपि विद्धायां न सम्भाव्योत्तरा तिथिः। शुद्धाधिकायां योगः स्यादेकस्मिन्वा दिनद्वये। नैकयोगेऽस्ति सन्देहो द्वियोगे प्रथमं दिनम्। सदा निशीथे पश्चाद्वेत्युत्तमो मध्यमोऽधमः। योगस्त्रिधापि पूर्वेद्युः सम्पूर्णत्वादुपोषणम्। विद्धाधिकायामप्येकदिनयोगे स गृह्यताम्। द्वयोर्योगस्त्रिधा भिन्नो निशीथे वृत्तिभेदतः। तद्वृत्ति-